Total No. of Questions : 7 ] [ Total No. of Printed Pages : 1

Code No. : MN-26

# स्नातकपरीक्षाः–२०१२

## बि.ए. – विद्वन्मध्यमा - प्रथमवर्षः

## शास्त्रम्–अद्वैतवेदान्तशास्त्रम्

### भागः - २ पत्रिका - १

### विषयः -उपनिषद्भाष्यम्–१

दिनाङ्कः - 16-03-2012 ] [गरिष्ठाङ्काः - १००

समयः- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

I. ईशावास्यादिमन्त्राणां कर्मसु अविनियुक्तत्वं प्रतिपादयत । 15

II. उपासकानां प्रार्थना कीदृशी ? विवृणुत । 15

III. 'नेदं यदिदमुपासते' इत्यादिना उक्तं निर्गुणं ब्रह्म उपपादयत ।

–अथवा–

नचिकेतसा प्रार्थितानि त्रीणि वराणि कानि ? तानि विलिखत । 15

IV. 'उपनिषदं भो ब्रूहि' इति पृच्छतः शिष्यस्य कोऽभिप्रायः ? विशदयत ।

–अथवा–

श्रेयःप्रेयोमार्गौ कौ ? स्पष्टयत । 15

V. सावतरणं व्याख्यात । 5x2= 10

१. तदेजति तन्नैजति तद्दूरे तद्वन्तिके ।
तदन्तरस्य सर्वस्य तदु सर्वस्य बाह्यतः ।।

२. यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः ।
मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः ।।

VI. लघुटिप्पणीः लिखत 5x4= 20

१. उपनिषत् । २. उपासना । ३. रथरूपककल्पना । ४. जीवन्मुक्तिः ।

VII. मन्त्रान् पूरयत । 2x5= 10

१. पूर्णमदः पूर्णमिदं......। २. ईशा वास्यमिदꣳसर्वं.......। ३. केनेषितं पतति........।

४. नाहं मन्ये सुवेदेति ..........। ५. न जायते म्रियते वा....

—o—

Total No. of Questions : 6 ] [ Total No. of Printed Pages : 1

Code No. : MN-27

# स्नातकपरीक्षाः—२०१२

## बि.ए. – विद्वन्मध्यमा - प्रथमवर्षः

## शास्त्रम्—अद्वैतवेदान्तशास्त्रम्

### भागः - २ पत्रिका - २

### विषयः -भगवद्गीताभाष्यम्—१

दिनाङ्कः - 19-03-2012 ] [गरिष्ठाङ्काः - १००

समयः- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

I. उपोद्घातभाष्यानुसारेण गीताशास्त्रस्य अनुबन्धचतुष्टयं प्रदर्शयत । 15

II. कर्मसहितात् ज्ञानात् कैवल्यप्राप्तिरिति समुच्चयवादं निराकृत्य भाष्योक्तदिशा सिद्धान्तं प्रतिपादयत । 15

III. 'अविदुषः कर्माणि विधीयन्ते' इति सभाष्यं समर्थयत । 15

IV. गीतोक्तनिष्ठाद्वयं विशधयत । 15

V. **सावतरणं श्लोकद्वयं व्याख्यात ।** 2x10= 20

१. नासतो विद्यते भावः नाभावो विद्यते सतः ।
उभयोरपि दृष्टोऽन्तः त्वनयोस्तत्वदर्शिभिः ।।

२. कर्मण्यकर्म यः पश्येत् अकर्मणि च कर्म यः ।
स बुद्धिमान् मनुष्येषु स युक्तः कृत्स्नकर्मकृत् ।।

३. ब्रह्मार्पणं ब्रह्म हविः ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ।।

VI. **यथाभाष्यं विशेषार्थं विशदयत ।** 10x2= 20

१. पण्डितः । २. तत्वदर्शी । ३. साङ्ख्यबुद्धिः ।

४. स्थितप्रज्ञः । ५. हृषीकेशः । ६. गुडाकेशः ।

७. संसिद्धिः । ८. लोकसङ्ग्रहः । ९. समत्वम् ।

१०. ब्राह्मी स्थितिः ।

—०—

Total No. of Questions : 6 ]

[ Total No. of Printed Pages : 1

Code No. : MN-28

# स्नातकपरीक्षाः—२०१२

## बि.ए. — विद्वन्मध्यमा - प्रथमवर्षः

## शास्त्रम्—अद्वैतवेदान्तशास्त्रम्

### भागः - २ पत्रिका - ३

### विषयः -वेदान्तसारः माण्डूकोपनिषद्भाष्यं च

दिनाङ्कः - 21-03-2012 ]

समयः- 10.00 A.M. to 1.00 P.M. ]

[ गरिष्ठाङ्काः - १००

[ Max. Marks : 100

---

I. अनुबन्धचतुष्टयं विलिख्य साधनचतुष्टयं विवृणुत । 15

II. मतान्तरप्रदर्शनपूर्वकं आत्मस्वरूपं निरूपयत ।

—अथवा—

महावाक्यार्थं विशदयत । 15

III. माण्डूकोक्तदिशा ओङ्कारस्वरूपं विलिखत । 15

IV. तुरीयः आत्मा निर्विशेषो वा शून्यो वा ? विमृशत ।

—अथवा—

आत्मनः चतुर्थपादं उपपादयत । 15

V. **इमे कारिके व्याख्यात** 2x10= 20

१. निवृत्तेः सर्वदुःखानामीशानः प्रभुरव्ययः ।
अद्वैतः सर्वभावानां देवस्तुर्यो विभुः स्मृतः ॥

२. प्रपञ्चो यदि विद्येत निवर्तेत न संशयः ।
मायामात्रमिदं द्वैतमद्वैतं परमार्थतः ॥

VI. **चतुर्णामेव लघुटिप्पणीः लिखत** 4x5= 20

१. अज्ञानस्य शक्तिद्वयम् ।   २. पञ्चीकरणम् ।

३. जहल्लक्षणा ।   ४. सृष्टिः ।

५. वैश्वानरः ।   ६. सगुणं ब्रह्म ।

—०—